# राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः
## विशिष्टाचार्यप्रवेशपरीक्षा -2020
## प्रश्नपत्रम्

विषयः- ज्योतिषम्                                                                 पूर्णाङ्काः-100

1 "वयं तत्त्वान्वेषान्मधुकर ! हतास्त्वं खलुकृती" इति वाक्येन अन्वेषणा-पदस्य प्रयोगः केन विहितः ?

A माघेन B कालिदासेन

C विष्णुशर्मणा D श्रीहर्षेण

2 अनुसन्धानस्य कोऽर्थः ?

A पुनः पुनः निरीक्षणम्

B समस्यायाः कृते निवारणोपायान्वेषणम्

C वैज्ञानिकोपायैः समस्यायाः सत्यासत्यप्रघटनम्

D विषयविस्तारं कृत्वा शोधप्रबन्धलेखनम्

3 अधोलिखितेषु अनुसन्धानस्य प्रथमं सोपानं किम् ?

A समस्यासहायकसामग्रीसङ्कलम् B समस्यायाः मूल्याङ्कनम्

C समस्यानिर्वाचनम् D समस्यासमाधानाय प्रयासः

4 अनुसन्धाने प्रतिपादितानि तथ्यानि कीदृशानि स्युः ?

A नमनीयानि B व्यावहारिकाणि

C मौलिकानि D एतत्सर्वम्

5 अधो लिखितेषु किं पदम् "अनुसन्धानम्" इतिपदेन समानार्थकं न भवति ?

A गवेषणम् B शोधसन्दर्भः

C संशोधनम् D परिशोधनम्

6 गुणात्मकानुसन्धाने अधोलिखितेषु किं नोपयुज्यते ?

A आगमनात्मकविश्लेषणम् (Individual Analysis)

B नैसर्गिकाध्ययनम् (Naturalistic Enquiry)

C अन्तर्दृष्टिः (Insight)

D संरचितसाक्षात्कारः (Structured Intervies)

7 "विमर्श" इति शब्दस्य कोऽर्थः ?

A कस्यापि मतस्य व्यङ्ग्यार्थनिर्धारणम्

B कस्यापि मतस्य व्यापकार्थपरिशीलनम्

C कस्यापि मतस्यानुवदनम्

D कस्यापि मतस्य स्वीकारः परिहारो वा

8 "भारतीयग्रन्थसम्पादनशास्त्रप्रवेशिनी" ग्रन्थः तिरुपतिराष्ट्रियसंस्कृतविद्यापीठेन कदा प्रकाशितः –

A 2001 B 2002

C 2010 D 2011

9 अधोलिखितेषु चिन्तनशीलप्रश्नः (Reflective Inquiry) कुत्र न प्रचलति ?

A ज्ञानमीमांसायाम् (In epistemology)

B मूल्यमीमांसायाम् (In axiology)

C अध्यात्मशास्त्रे (In metaphysics)

D ऐतिहासिकानुसन्धाने (In historical Research)

10 अधोलिखितेषु किम् ऐतिहासिकानुसन्धानस्य क्षेत्रमुच्यते ?

A अर्थनीतिः B सभ्यता

C अभिलेखः D एतत्सर्वम्

11 आधुनिकोपकरणेषु किं नान्तर्भवति ?

A अन्तर्जालम् B ई - शोधपत्रिका

C ग्रन्थसूची D ई – कोषाः

12 अधोलिखितेषु कानि सामग्रीसङ्कलने प्राथमिकस्रोतांसि भवन्ति ?

A शोधपत्रिकाः B शासकीयानि अभिलेखानि

C साहित्येतिहासः D कोशाः

13 संस्कृतवाङ्मये पुराणानि प्रामुख्येन कीदृशम् अनुसन्धानं सूचयन्ति ?

A ऐतिहासिकम् B दार्शनिकम्

C संख्यात्मकम् D प्रायोगिकम्

14 आगमशास्त्रेषु अनुसन्धानस्य प्रधानं क्षेत्रं किम् ?

A आलयसंस्कृतिः B सौन्दर्यसाधनम्

C आत्मतत्त्वविमर्शः D राजतन्त्रसंस्कृतिः

15 राष्ट्रियपाण्डुलिपि मिषन् इति संस्थायाः ध्येयवाक्यं किम् ?

A या विद्या सा विमुक्तये B तमसो मा ज्येतिर्गमय

C विज्ञानमुपास्व D मातृकां रक्षत

16 "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति अनुसन्धानसूत्रं कुत्र वर्तते ?

A तैत्तिरीयोपनिषदि B कठोपनिषदि

C बृहदारण्यकोपनिषदि D प्रश्नोपनिषदि

17 अनुसन्धानप्रविधेः कृते अपेक्षिताः षोडश पदार्थाः कस्मिन् दर्शने प्राप्यन्ते ?

A वेदान्तदर्शने B सांख्यदर्शने

C न्यायदर्शने D योगदर्शने

18 अनुसन्धानाय अपेक्षितानि प्रमाण-प्रमेय-विमर्श-निर्णय-प्रवृत्त्याख्यानि तत्त्वानि कुत्र वर्णितानि ?

A युक्तिदीपिकायाम् B शृङ्गारप्रकाशे

C रामायणे D श्रीमद्भगवद्गीतायाम्

19 "भारतस्य संस्कृतपत्रिकाः पत्रकाराश्च" इति कीदृशम् अनुसन्धानम्?

A सर्वेक्षणम् B शास्त्रीयम्

C तुलनात्मकम् D क्षेत्रीयम्

20 "विमूढाः नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः" इति कुत्रोक्तम् ?

A रामायणे B स्कन्दपुराणे

C गीतायाम् D भागवते

21 आदित्यदासतनयः कः ?

A गणेशः B सूर्यः

C वराहमिहिरः D शनिः

22 वराहमिहिरस्य शिष्यस्य नाम किम् ?

A पृथूयशाः B श्रीधरः

C लल्लः D भटोत्पलः

23 अमरज्योतिषां भर्ता कः ?

A इन्द्रः B चन्द्रः

C बृहस्पतिः D सूर्यः

24 वेदाङ्गज्योतिषस्य कर्ता कः ?

A लगधः B आर्यभटः

C लल्लः D ब्रह्मदेवः

25 कः सलिलमयबिम्बः ?

A सितः B वरुणः

C चन्द्रः D अम्बुदः

26 कः उडुपतिः ?

A चन्द्रः B अश्विनी

C ग्रहः D राशिः

27 का नाम होरा ?

A घटिकार्धम् B राश्यर्धम्

C दिनार्धम् D नक्षत्रार्धम्

28 एकस्यां घटिकायां कति निमेषाः ?

A 24 B 60

C 48 D 12

29 एकस्मिन् भगणे कति नक्षत्रपादाः भवन्ति ?

| | | | |
|---|---|---|---|
| A | 108 | B | 9 |
| C | 120 | D | 27 |

30 कालनरस्य मुखे कः राशिः वर्तते ?

| | | | |
|---|---|---|---|
| A | मेषः | B | वृषभः |
| C | मिथुनम् | D | न कोऽपि राशिः |

31 एकराशौ  कति कलाः ?

| | | | |
|---|---|---|---|
| A | 1800<sup>।</sup> | B | 1200<sup>।</sup> |
| C | 3600<sup>।</sup> | D | 5400<sup>।</sup> |

32 मीनराशेः नवम-नवांशराश्याधिपः कः ?

| | | | |
|---|---|---|---|
| A | गुरुः | B | शुक्रः |
| C | चन्द्रः | D | शनिः |

33 रक्तकारकः ग्रहः कः?

| | | | |
|---|---|---|---|
| A | चन्द्रः | B | कुजः |
| C | शुक्रः | D | सूर्यः |

34 क्रीड़ास्थलेषु कस्य ग्रहस्य स्थानम् ?

| | | | |
|---|---|---|---|
| A | चन्द्रस्य | B | शुक्रस्य |
| C | बुधस्य | D | राहोः |

35 जूकः कस्य राशेः पर्यायनाम ?

| | | | |
|---|---|---|---|
| A | तुला | B | कन्या |
| C | बृश्चिकः | D | न कोऽपि राशिः |

36 सौम्यः कः?

| | | | |
|---|---|---|---|
| A | सोमः | B | बुधः |
| C | गुरुः | D | शुक्रः |

37 समीरणपदेन का संख्या ग्राह्या ?

| | | | |
|---|---|---|---|
| A | 49 | B | 00 |
| C | 05 | D | 07 |

38 कौर्पिकराशेः अधिपः कः ?

A कुजः B सौम्यः

C शुक्रः D कोऽपि नास्ति

39 उभयोदयराशिः कः?

A वृषभः B तुला

C धनुः D मीनः

40 विषमराशेः 110 तः 180 मध्ये स्थितस्य ग्रहस्य त्रिंशांशापतिः कः?

A गुरुः B शुक्रः

C बुधः D शनिः

41 विषमहोराधिपः कः ?

A चन्द्रः B सौम्यः

C सितः D सूर्यः

42 मकरराशौ कः ग्रहः उच्चस्थो भवति ?

A शनिः B कुजः

C गुरुः D शुक्रः

43 गुरोः नीचराशिः कः ?

A कर्कः B मीनः

C कन्या D मकरः

44 सूर्यस्य मूलत्रिकोणराशिः कः ?

A सिंहः B मेषः

C धनुः D कुम्भः

45 कः हिबुकभावः ?

A प्रथमभावः B द्वितीयभावः

C दशमभावः D चतुर्थभावः

46 कः द्युनभावः ?

A प्रथमभावः B सप्तमभावः

C दशमभावः D द्वादशभावः

47 मेषूरणभावः कः ?

A तृतीयभावः B चतुर्थभावः

C प्रथमभावः D दशमभावः

48 कः दुश्चिक्यभावः ?

A द्वादशभावः B अष्मभावः

C तृतीयभावः D मारकभावः

49 हेलिः कः ?

A सूर्यः B उल्का

C ध्रुवः D नीहारिका

50 कः क्रूरदृक् ?

A शनिः B कुजः

C सूर्यः D राहुः

51 विशेषतः त्रि-दशदृष्टिरस्ति कस्य ग्रहस्य ?

A शनेः B गुरोः

C कुजस्य D न कस्यापि ग्रहस्य

52 दक्षिणदिशि बलिनौ कौ ?

A कुज-शनी B गुरु-शुक्रौ

C शुक्र-चन्द्रौ D रवि-कुजौ

53 चतुर्थभावे वलिनौ कौ ?

A चन्द्र-शुक्रौ B शुक्र-बधौ

C बुध-गुरू D चन्द्रार्कौ

54 शिखी कः ?

A कुजः B रविः

C केतुः D शनिः

55 मज्जाकारकः ग्रहः कः ?

A बुधः B कुजः

C शुक्रः D गुरुः

56 श्नायुकारकः ग्रहः कः ?

A शुक्रः B गुरुः

C राहुः D शनिः

57 ऋग्वेदाधिपः कः ?

A गुरुः B रविः

C शुक्रः D बुधः

58 कस्य ग्रहस्य शत्रुर्नास्ति ?

A शुक्रस्य B गुरोः

C चन्द्रस्य D बुधस्य

59 सन्तानकारकः ग्रहः कः ?

A शुक्रः B बुधः

C चन्द्रः D गुरुः

60 कौ नित्य मार्गिणौ ?

A राहु-कोतू B कुज-चन्द्रौ

C रवि-चन्द्रौ D बुध-शुक्रौ

61 कलनात्मककालः कतिविधः ?

A एकविधः B द्विविधः

C बहुविधः D त्रिविधः

62 विनाडीका स्यात् कतिभिः प्राणैः ?

A षड्भिः B दशभिः

C त्रिभिः D द्वादशभिः

63 नाडीषष्ट्या किमुच्यते ?

A सावनदिनम् B चान्द्रदिनम्

C नाक्षत्रदिनम् D सौरदिनम्

64 ज्योतिषशास्त्रस्य प्रवर्त्तकाः कति ?

A 12 B 09

C 18 D 14

65 सूच्या भिन्ने पद्मपत्रे किमभिधीयते ?

A त्रुटिः
B रेणुः
C लवः
D लिक्षकः

66 एकस्मिन् तिथौ रविचन्द्रयोः गत्यन्तरं कति ?

A $15^0$
B $13^0$
C $12^0$
D $9^0$

67 दिव्यदिनं सम्भवति कथम् ?

A द्वादशचान्द्रमासैः
B द्वादशसौरमासैः
C द्वादशनाक्षत्रमासैः
D त्रयोदशचान्द्रमासैः

68 कदा उत्तरायणस्यारम्भः ?

A मेषादौ
B मकरादौ
C तुलादौ
D कर्कादौ

69 दक्षिणगोलस्यारम्भः कस्मात् ?

A मेषादौ
B मकरादौ
C तुलादौ
D कर्कादौ

70 कस्मिन् राशौ स्थिते सूर्ये देवानां मध्याह्नम् ?

A मेषे
B मकरे
C तुलायाम्
D कर्काटके

71 एकः भगणः कति कलाः ?

A 12600ᴵ
B 3600ᴵ
C 21600ᴵ
D 5400ᴵ

72 एकस्मिन् मन्वन्तरे कति महायुगानि भवन्ति ?

A 71
B 72
C 14
D 100

73 एकस्मिन् महायुगे कति दिव्यवर्षाणि भवन्ति ?

A 1000 B 12000

C 1200 D 10000

74 एकस्मिन् कल्पे कति महायुगानि भवन्ति ?

A 1000 B 12000

C 1200 D 10000

75 नक्षत्रमेकं कति कलाः ?

A $720^{I}$ B $1800^{I}$

C $800^{I}$ D $270^{I}$

76 एकस्मिन् महायुगे सूर्यस्य भगणप्रमाणं कति ?

A 4320000 B 21600

C 12000 D 43200000

77 सौरमासोनाः चान्द्रमासाः किं स्युः ?

A अवममासाः B अधिमासाः

C सावनमासाः D चान्द्रमासाः

78 चान्द्रमासौ कौ ?

A मेष-वैशाखौ B श्रावण-मकरौ

C कुम्भ-मीनौ D आश्विन-कार्त्तिकौ

79 मध्यमानेन कति चान्द्रमासेभ्यः एकः अधिमासः सम्भवति ?

A 32 B 12

C 108 D 120

80 उदयादुदयं भनोः किं स्यात् ?

A नाक्षत्रदिनम् B सौरदिनम्

C तिथिः D सावनदिनम्

81 गुरोः एकभगणे कति सौरवर्षाणि भवन्ति ?

A 60 B 12

C 30 D 18

82 सूर्यसिद्धान्तानुसारं भुवः मध्यमव्यासयोजनानि कति ?

A 1600 B 45000

C 1200 D 800

83 कस्य ग्रहस्य शरः नास्ति ?

A चन्द्रस्य B सूर्यस्य

C शनेः D न कस्यापि

84 270। कलाः शरः सम्भवति कस्य ग्रहस्य ?

A गुरोः B शनेः

C चन्द्रस्य D बुधस्य

85 सूर्यग्रहणे च्छादकः कः ?

A चन्द्रः B सूर्यः

C भूभा D भूमिः

86 चन्द्रग्रहणे च्छाद्यः कः ?

A चन्द्रः B सूर्यः

C भूभा D भूमिः

87 सूर्यग्रहणं कदा सम्भवति ?

A अमान्ते B अमान्ते शराभावे

C पूर्णिमान्ते D पूर्णिमान्ते शराभावे

88 चन्द्रग्रहणं कदा सम्भवति ?

A पूर्णिमान्ते B अमान्ते शराभावे

C अमान्ते D पूर्णिमान्ते शराभावे

89 ग्रहणस्य मध्यमकालः कदा ?

A तिथिमध्ये B तिथ्यादौ

C तिथ्यन्ते D तिथिकालः

90 लम्बनं कुत्र संस्क्रियते ?

A शरे B तिथौ

C क्रान्तौ D ग्रहे

91 सूर्यग्रहणे स्पर्शः कस्यां दिशि ?

A पूर्वदिशि
B खमध्ये
C पश्चिमदिशि
D न कुत्रापि

92 चन्द्रग्रहणे मोक्षः कस्यां दिशि ?

A उत्तरस्याम्
B पश्चिमस्याम्
C पूर्वस्याम्
D गगने

93 चन्द्रग्रहणे रविचन्द्रयोरन्तरं कति ?

A $180^0$
B $360^0$
C $120^0$
D $30^0$

94 रविचन्द्रयोः स्थितिः एकांशत्वे का तिथिः ?

A पूर्णिमा
B शुक्लप्रतिद्
C कृष्णचतुर्दशी
D अमावास्या

95 कस्यां तिथौ सूर्येण सह चन्द्रः उदेति अस्तमेति च ?

A अमायाम्
B पूर्णिमायाम्
C पञ्चम्याम्
D न कदापि

96 ग्रहणे रविचन्द्रयोः पूर्वापरान्तरं किमुच्यते ?

A नतिः
B लम्बनम्
C स्थितिः
D वलनम्

97 चन्द्रग्रहणे अर्धबिम्बादूने ग्रस्ते कः वर्णः ?

A कृष्णः
B रक्तः
C धूम्रः
D श्वेतः

98 दशमलग्नं कुत्र सम्भवति ?

A खमध्ये
B पूर्वक्षितिजे
C पश्चिमक्षितिजे
D अधःक्षितिजे

99 नित्यविलोमगतिः कस्य ?

A कुजस्य
B शुक्रस्य
C शनेः
D पातस्य

100 कदा खग्रहणं सम्भवति ?

A ग्राह्यात् ग्राहकः अधिकः

B ग्राहकात् ग्राह्याधिकः

C ग्राह्यग्राहकयोः बिम्बसमत्वे

D ग्राह्यग्राहकयोः बिम्बाधिकत्वे

## ANSWER KEY

M.Phil – Jyotisha

| *Q. No* | KEY | *Q. No* | KEY | *Q. No* | KEY | *Q. No* | KEY |
|---|---|---|---|---|---|---|---|
| 1 | B | 26 | A | 51 | A | 76 | A |
| 2 | C | 27 | B | 52 | D | 77 | B |
| 3 | C | 28 | A | 53 | A | 78 | D |
| 4 | D | 29 | A | 54 | C | 79 | A |
| 5 | B | 30 | B | 55 | B | 80 | D |
| 6 | D | 31 | A | 56 | D | 81 | B |
| 7 | D | 32 | A | 57 | A | 82 | A |
| 8 | B | 33 | A | 58 | C | 83 | B |
| 9 | D | 34 | C | 59 | D | 84 | C |
| 10 | D | 35 | A | 60 | C | 85 | A |
| 11 | C | 36 | B | 61 | B | 86 | A |
| 12 | B | 37 | C | 62 | A | 87 | B |
| 13 | A | 38 | A | 63 | C | 88 | D |
| 14 | A | 39 | D | 64 | C | 89 | C |
| 15 | C | 40 | A | 65 | A | 90 | B |
| 16 | C | 41 | D | 66 | C | 91 | C |
| 17 | C | 42 | B | 67 | B | 92 | B |
| 18 | B | 43 | D | 68 | B | 93 | A |
| 19 | D | 44 | A | 69 | C | 94 | D |
| 20 | C | 45 | D | 70 | D | 95 | A |
| 21 | C | 46 | B | 71 | C | 96 | B |
| 22 | D | 47 | D | 72 | A | 97 | C |
| 23 | D | 48 | C | 73 | B | 98 | A |
| 24 | A | 49 | A | 74 | A | 99 | D |
| 25 | C | 50 | B | 75 | C | 100 | A |